# Svastivachana-Gitika

# સ્વસ્તિવાચન-ગીતિકા

## Document Information

Text title : Svastivachana-Gitika

File name : svastivAchanagItikA.itx

Category : misc, sanskritgeet, hkmeher

Location : doc_z_misc_general

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Svasti-Kavitanjalih (Sanskrit Gitikavya)

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# સ્વસ્તિવાચન-ગીતિકા

સ્વસ્તિવાચનમ્, સ્વસ્તિવાચનમ્, સ્વસ્તિવાચનમ્ ॥ ધ્રુવપદમ્॥

સ્વમાતૃભૂમી ભારત-રાષ્ટ્રમ્,
જગત્યર્ચિતં ચર્ચિત-શાસ્ત્રમ્ ।
ધામ સુધાન્યં કલા-નિધાનમ્, મણી-કાઞ્ચનમ્ ।
સદા તદર્થં હૃદા વન્દનમ્, સ્વસ્તિવાચનમ્ ॥ ૧॥

ભારતીય-સંસ્કૃતેર્મહત્ત્વમ્,
માનવતાયા દર્શન-તત્ત્વમ્ ।
ઇહૈક-નીડ઼ં વિશ્વજનીનમ્, શાશ્વતં ધનમ્ ।
સદા તદર્થં સદ્-વિવેચનમ્, સ્વસ્તિવાચનમ્ ॥ ૨॥

ધ્વજં ત્રિરઙ્ગં દેશ-ગૌરવમ્,
સમતા-મૈત્રી-શાન્તિ-વૈભવમ્ ।
રાજતે રમ્યં સૌમ્ય-પાવનમ્, શૌર્ય-કેતનમ્ ।
સદા તદર્થં મુદા વન્દનમ્, સ્વસ્તિવાચનમ્ ॥ ૩॥

ભારતે ત્રયી સૈન્યવાહિની,
સૈવ વૈરિણાં દૈન્યદાયિની ।
દેશ-રક્ષણે દત્ત-જીવનમ્, સત્પ્રયોજનમ્ ।
અસ્તિ તદર્થં હાર્દ-વન્દનમ્, સ્વસ્તિવાચનમ્ ॥ ૪॥

ભારતભૂતિ-ર્ગિરા સંસ્કૃતમ્,
ભાષા-જનની જનૈરાદૃતમ્ ।
નિત્ય-નૂતનં યુગ-સ્પન્દનમ્, સુધાસેચનમ્ ।
અસ્તિ તદર્થમ્, આસ્તિકાયનમ્, સ્વસ્તિવાચનમ્ ॥ ૫॥

વિશ્વમઙ્ગલા વિવિધા વિદ્યા,
સાદર-વેદ્યા સદાનવદ્યા ।

જ્ઞાનમુજ્જ્વલં તમોનાશનમ્, દિવ્ય-લોચનમ્ ।
અસ્તિ તદર્થં સમારાધનમ્, સ્વસ્તિવાચનમ્ ॥ ૬॥

આદ્ય-ગુરુવરૌ માતાપિતરૌ,
સન્તાન-હિતે નિત્ય-તત્પરૌ ।
તયોઃ સુગન્ધં પરમાનન્દમ્, પ્રેમ-બન્ધનમ્ ।
અસ્તિ તદર્થં ભક્તિ-પૂજનમ્, સ્વસ્તિવાચનમ્ ॥ ૭॥

હન્તિ ગુરુર્વૈ હૃદય-ધ્વાન્તમ્,
જ્વાલયન્ સદા જ્ઞાન-સુદીપમ્ ।
માર્ગદર્શનં શુભાલોકનમ્, દોષમોચનમ્ ।
તસ્મૈ નમનં સાભિવાદનમ્, સ્વસ્તિવાચનમ્ ॥ ૮॥

ચરાચરમિદં યેન નિર્મિતમ્,
ઊર્મિલ-નાદં રમ્ય-નામિતમ્ ।
સ હિ પરમેશઃ સદા નમસ્યઃ, ભક્તિભાજનમ્ ।
સદા તદર્થં સુનીરાજનમ્, સ્વસ્તિવાચનમ્ ॥ ૯॥

નારી-પુરુષૌ રથે દ્વિ-ચક્રમ્,
દ્વયોઃ સાધ્યતે ગૃહસ્થ-લક્ષ્યમ્ ।
સૃષ્ટિ-વિધાને સન્નિબન્ધનમ્, સુસઙ્કલ્પનમ્ ।
અસ્તિ તદર્થં ભાવ-ચન્દનમ્, સ્વસ્તિવાચનમ્ ॥ ૧૦॥

સુરસા ભવ્યાઃ પ્રતિમા દેવ્યાઃ,
વહન્તિ મહિલા ગુણાન્ પૃથિવ્યાઃ ।
સુન્દરતાયાઃ સન્નિદર્શનમ્, સ્વાન્ત-મોહનમ્ ।
અસ્તિ તદર્થં પ્રણત્યર્ચ્ચનમ્, સ્વસ્તિવાચનમ્ ॥ ૧૧॥

પ્રકૃતેર્જન્યા વન્ય-સમ્પદા,
ઉદ્ભિત્-સકલા લોક-જીવદા ।
સ્થલ-જલ-નભગં જગન્માણ્ડનમ્, સમં સાધનમ્ ।
અસ્તિ તદર્થં કામ્ય-સેવનમ્, સ્વસ્તિવાચનમ્ ॥ ૧૨॥

પ્રિય-સઙ્ગીતં રામણીયકમ્,
સાહિત્ય-કલા-નાટકાદિકમ્ ।
સુપ્રસાદનં રસાસ્વાદનમ્, મનોમોદનમ્ ।
અસ્તિ તદર્થં સ્વવાતાયનમ્, સ્વસ્તિવાચનમ્ ॥ ૧૩॥

સન્તઃ સમાજ-સુસંસ્કારકાઃ,
સન્તિ લેખકા દિશાં દર્શકાઃ ।
સુપ્રતિભાયા નવ્ય-સર્જનમ્, સમુદ્ભાવનમ્ ।
અસ્તિ તદર્થં પુણ્ય-ચિન્તનમ્, સ્વસ્તિવાચનમ્ ॥ ૧૪॥

વૈજ્ઞાનિકાશ્ચ વર-ક્રીડ઼્કાઃ,
દેશ-સમ્માન-સમુન્નાયકાઃ ।
વિવિધે ક્ષેત્રે મહદવદાનમ્, યશોવર્ધનમ્ ।
અસ્તિ તદર્થં સાભિનન્દનમ્, સ્વસ્તિવાચનમ્ ॥ ૧૫॥

સ્વસ્તિવાચકા ભારતાર્ચ્ચકાઃ,
લોક-હિતાર્થં લગ્ન-મનસ્કાઃ ।
કૃતે ચ તેષાં સસમ્માનનમ્, સુવર્ધાપનમ્ ।
અસ્તિ તદર્થં પૂત-ભાવનમ્, સ્વસ્તિવાચનમ્ ॥ ૧૬॥

– રચયિતા - ડૉ હરેકૃષ્ણ-મેહેરઃ

Copyright Dr.Harekrishna Meher

*Svastivachana-Gitika*
pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*